International Journal of Applied Research 2018; 4(1): 434-436




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(1): 434-436
www.allresearchjournal.com
Received: 13-11-2017
Accepted: 16-12-2017

**डॉ. ऋद्धिनाथ झाः**
सहायक प्राचार्यः, शिक्षा शास्त्र विभागः,
का. सिं. द. सं. वि. वि. दरभंगा,
बिहार, भारत

**Corresponding Author:**
**डॉ. ऋद्धिनाथ झाः**
सहायक प्राचार्यः, शिक्षा शास्त्र विभागः,
का. सिं. द. सं. वि. वि. दरभंगा,
बिहार, भारत

# कारकेषु कर्तृत्वविचारः

**डॉ. ऋद्धिनाथ झाः**

**प्रस्तावना**

व्याकरणस्य समेषु महत्त्वपूर्णेषु विषयेषु कारकतत्त्वमन्यतमं वर्तते। कारकं हि न केवलं भाषाया भवति, अपितु अस्योत्पत्तिः दार्शनिकदृष्ट्यापि कर्तुं शक्यते। कारकं नाम किमिति प्रश्ने विविधाचार्यैः विविधप्रकारैः तन्निरूपणं कृतम्। वस्तुतः कारकमिति शब्दः अन्वर्थसंज्ञकोऽस्ति। तेनान्वर्थसंज्ञकत्वाद् एतस्य लक्षणं भवति– करोतीति कारकमिति। तद्यथोक्तम्– 'तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत करोतीति कारकमि'ति। [1] अत्र लक्षणवाक्ये करोतीति पदं क्रियायाः उपलक्षकं विद्यते। वस्तुतस्तु कारकं संज्ञाविशेषस्य सूचकं विद्यते। एतेन ज्ञायते यद् यः क्रियायाः सम्पादकः, निष्पादकः जनको वा भवति तत्कारकमिति कथ्यते। अतः कथितम्– 'क्रियानिष्पादकत्वं कारकत्वमि'ति। [3] अपि च– 'क्रियाजनकत्वं कारकत्वमि'ति। [3] अपरत्र च– 'क्रियाजनकत्वं हि कारकत्वमि'ति। [4] कथमेवं कियां जनयति कारकमिति चेद् गच्छतीति काचन क्रिया, तस्याः क्रियायाः निष्पत्तये न्यूनातिन्यूनं किं किमपेक्षितमिति चेत्, गच्छन् कश्चन व्यक्तिः देवदत्तादिः गमनार्थं किञ्चित् स्थानं मन्दिरादि, तत्स्थानगमनार्थं तस्योपकारत्वेन किञ्चित् यानादि इत्येवमारभ्य गच्छतीति क्रियां निष्पादयितुं यानि यानि साधनानि अपेक्षितानि तानि सामान्यतः कारकाणि इत्युच्यन्ते। अथवा गच्छतीति क्रियायां कः गच्छति, का गच्छति, कथं गच्छति, कस्माद् गच्छति इत्येवं याः आकाङ्क्षाः आगच्छन्ति तासां समाधानरूपाणि कारकाणीत्युच्यन्ते, यतोहि तान्येव वस्तुतः गच्छतीति क्रियां साधयन्ति।

यद्यपि क्रियानिष्पादकत्वमेव कारकं भवति, तथापि तस्यावान्तरभेदाः अपि भवन्ति। क्रियायाः निष्पत्त्यर्थं कारकैः अवश्यमेव कश्चिदपि व्यापारः क्रियते एवं चास्य व्यापारस्य प्रकृतिभेदानुसारं कारकस्यानेके अवान्तरभेदाः जायन्ते।

भगवता पाणिनिना अष्टाध्यायां 'कारके' [5] इति सूत्राधिकारे अपादानादिसंज्ञानां विधायकानि सूत्राणि पठितानि। यथा– 'ध्रुवमपायेऽपादानम्', 'कर्मणा यमभिप्रैति स सम्प्रदानम्', 'साधकतमं करणम्', 'आधारोऽधिकरणम्', 'कर्तुरीप्सिततमं कर्म', 'स्वतन्त्रः कर्ता' इत्यादीनि। एषां समेषां सूत्राणामध्ययनेन ज्ञायते यत् कर्ता–कर्म–करण–सम्प्रदान–अपादान– सम्बन्धादीनि षडेव कारकाणि मन्यन्ते, न तु सम्बन्धः सम्बोधनञ्चापि। तद्यथोक्तम्–

'कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च।
अपादानाधिकरणमित्याहुः कारकाणि षट्।।' [6]

वस्तुतः सर्वाणि कारकाणि येन केनापि प्रकारेणावश्यमेव कर्ता भवति, यतोहि स्वकीये व्यापारे सर्वाणि स्वतन्त्राणि भवन्ति। तत्र स्वातन्त्र्यमेव कर्तृत्वस्य मौलिकं वैशिष्ट्यं भवति। परञ्च व्यापारभेदापेक्षया कारकस्य करणाधिकरणादयो भेदाः जायन्ते। तद्यथोक्तम्–

'व्यापारमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।
व्यापारभेदापेक्षायां करणत्वाविसम्भवः।।' [7]

भर्तृहरिणा स्पष्टमेवोक्तं यत् कारकशक्तिः (यदा शक्तिः कारकमिति कथ्यते) एका एव भवति, परञ्च निमित्तभेदात् एकमेव कर्तृत्वं षड्विधानि जायन्ते। तद्यथा–

'निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते।
षोढा कर्तृत्वमेवाहुः तत्प्रवृत्तेर्निबन्धनम्।।' [8]

हेलाराजोऽपि सर्वाणि कारकाणि कर्ता एव भवन्तीति स्वीकरोति। तद्यथा– 'कर्तृत्वमेव अवान्तरव्यापारविवक्षया करणादिव्यपदेशरूपतां भजते' इति। [9]

भर्तृहरिणा अपरदृष्ट्यापि विषयेऽस्मिन् विचारः कृतः। तेनोक्तं यत् कारकशक्तिः आकारादिभेदेन अपरिमिता भवति। परञ्च अपरिमितत्वादपि तत्त्वतः तस्याः परिगणनं षड्विधैः कर्तुं शक्यते। तद्यथा–

'द्रव्याकारादिभेदेन ताश्चापरिमिता इव।
दृश्यन्ते तत्त्वमासान्तु षट्शक्तिर्नातिवर्तते'।।[10]

वस्तुतः व्यापारभेदेन कारके अवान्तरभेदाः भवन्ति। सः व्यापारभेदः कीदृशो भवतीति तथ्यं नागेशेन समुद्घाटितम्– 'कर्तुः कारकान्तरप्रवर्त्तनं व्यापारः क्रियाफलेन उद्देश्यत्वरूपव्यापारस्य कर्मणः, करणस्य क्रियाजनकाव्यवहितव्यापारः, प्रेरणानुमत्यादि–व्यापारः सम्प्रदानस्य, अवधिभावोपगमव्यापारोऽपादानस्य, कर्तृकर्मव्यवहितक्रियाधारण– व्यापारोऽधिकरणस्य' इति।[11]
अवान्तरभेदेनैकैव कर्तृत्वशक्तिः करण–अपादान–अधिकरण–प्रभृतिषु विभज्यन्ते, मतमिदं नैयायिकाः अपि स्वीकुर्वन्ति। तत्र वाचस्पतिमिश्रस्य मतं वर्तते यत् एकस्यामेव पाकक्रियायां कदाचिद् देवदत्तः कदाचिच्च तण्डुलः कर्ता। एतस्य कारणं वर्तते अवान्तरव्यापारभेदा एवेति। तद्यथा– 'यस्य हि व्यापारं प्राधान्येन धातुः, आख्यातः प्रत्ययो वा अभिधते स स्वतन्त्रः कर्ता। तथाहि– विक्लिदन्तीत्यत्र तण्डुलादयः कर्तारः, पचतीत्यत्र देवदत्तादयः। तत् कस्य हेतोः? एकत्र तण्डुलादेः व्यापार उपात्तः अपरत्र देवदत्तादेः प्राधान्येन च अशेषकारकनिर्वर्त्यत्वं प्रधानक्रियाया इति। अवान्तरे व्यापारभेदेऽपि प्रधानक्रियोद्देश्येन समस्तकारकप्रवृत्तेः' इति।[12]
नागेशेन किल कारकप्रकरणास्यारम्भः एतेभ्यो भेदेनैव कृतः। तत्र कारकस्य निरूपणमेकं श्लोकमुद्धृत्य प्रारभते। यथा–

'कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च।
अपादानाधिकरणमित्याहुः कारकाणि षट्।।'

लोकेऽस्मिन् सामान्यतया कर्ता–कर्म–करण–सम्प्रदान–अपादान–अधिकरण– प्रभृतीनां कारकाणां प्रसिद्धः क्रमः प्रस्तुतः। तेषां विवरणानुसारमेतानि सर्वाणि कारकाणि स्व–स्वावान्तरक्रियया मुख्यक्रियानिष्पादने सहायकानि भवन्ति। तद्यथोक्तम्– 'सर्वेषां च कारकाणां स्व–स्वान्तरक्रियाद्वारा क्रियानिष्पादकत्वं बोध्यमि'ति।[13] मुख्यक्रियायाः आश्रयः सर्वदा कर्ता एवावतिष्ठते।
एतत् संबन्धतया सर्वदा श्रूयमाणं पदान्तरं वर्तते विभक्तिरिति। परम्परया अनधीतव्याकरणानां जिज्ञासूनां कदाचिदियं भ्रान्तिरपि स्याद् यदिदं कारकं, सा विभक्तिश्च– उभावपि एक एव, अथ को वा भेद एतयोरिति चेत् 'राम गृह विद्यालय गच्छति' इत्यत्र गच्छतीति क्रियासाधनानि कारकाणि भवन्ति राम–गृह–विद्यालयशब्दाः। किन्त्वत्र एतेषां सत्त्वेऽपि वाक्यमसम्पूर्णम् अर्थाऽवबोधकञ्च। अतः केवलमेतेषां क्रियायाश्च उपस्थित्या नालं किन्तु एतदुभयसम्बन्धिकाः काश्चनाऽप्यावश्यकाः याः कथ्यन्ते विभक्तयः इति। एवं चायं कर्ता, इदं कर्म इत्येवं कारकाणां बोधिकाः एव विभक्तयः। 'विवक्षातः कारकाणि भवन्ति' इति वचनाद् एतानि विवक्षाधीनानि कारकाणि षडित्युक्तम्। तत्रैकैकमपि कारकं कर्त्रादिप्रकारभेदेन शुद्ध–प्रयोजकादिरूपेण पुनर्विभज्यते। तत्र को नाम अयं कर्ता? व्याकरणे अस्य कथं निर्वचनम्? इत्यादिविषयाः विचार्यन्तेऽत्र। तत्र कर्तृसंज्ञाविधायकं पाणिनीयसूत्रं भवति– 'स्वतन्त्रः कर्ता'[14] इति। क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यादित्यर्थः। स्वातन्त्र्यमत्र प्राधान्यम्। स्वातन्त्र्यञ्च धात्वर्थव्यापाराऽऽश्रयत्वमिति भूषणकारः। 'चैत्रः पचती'त्युदाहारण–स्वीकारे, पच्–धातुः (डुपचष् पाके) तदर्थः विक्लित्त्यनुकूलो व्यापारः, तदाऽऽश्रयत्वं चैत्रे वर्तते इति चैत्रस्य कर्तृत्वम्। 'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते' इति वाक्यपदीयकारश्च। 'स्थाली पचति' इत्यादौ स्थालिनिष्ठव्यापार एव पच्–धातुना अभिधीयते इत्यतः उच्यते– 'यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा कर्ता' इति। 'कर्तृकरणयोस्तृतीया'[15] इति सूत्रेणानभिहिते कर्तरि तृतीयाविभक्तिः प्रयुज्यते। 'अनभिहिते' इत्यधिकारः। 'अभिधानं च प्रायेण तिङ्–कृत्–तद्धित–समासैरि'ति कौमुदीकारः।[16] 'चैत्रः ग्रामं गच्छति' इत्यादौ तिङा चैत्ररूपः कर्ता अभिहितः इत्यतः तस्मात् तृतीया न। तत्र 'शेषे प्रथमा'[17] इति प्रथमैव।
अयं च कर्ता त्रिधा उक्तः– प्रयोजककर्ता, कर्मकर्ता, शुद्धकर्ता चेति। तत्र प्रयोजककर्तुः उदाहरणं 'हरिणा कार्यते' इति। अयमेव प्रयोजको हेतुः। स च हेतुः णिजर्थ– प्रेरणाश्रयः। अत्रोदाहरणे हरिर्हेतुः प्रेरकः प्रयोज्यः भक्तादिः। 'कृष्णं गोकुलं गमयति' इत्यत्र प्रयोजककर्तुः रामादेः प्रेरणया गम्–धात्वर्थोत्तरदेशसंयोगानुकूलव्यापाराश्रयः कृष्णः, अत्र गमयति इति ण्यन्तम्। 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माऽकर्मकाणामणिकर्ता णौ'[18] इत्यनेन ण्यन्तावस्थायां कृष्णस्य कर्मत्वेऽपि गम्–धात्वर्थप्रधानव्यापाराऽऽश्रयत्वात् तस्य कर्तृत्वं वर्तते। अतोऽत्र कृष्णः कर्मकर्ता इत्युच्यते। तद्यथोक्तम्– 'अत्राणौ कर्तुः कृष्णस्य गतिबुद्धीत्यादि– कर्मसंज्ञाविधानात् कर्तृसंज्ञायाः बाधेऽपि प्रकृतधातूपात्तप्रधानव्यापाराऽऽश्रयरूपकर्तृत्वलक्षणस्य सत्त्वात् कृष्णः कर्मकर्ता इति। शुद्धत्वस्य लक्षणम्– 'हेतुत्वाऽनाश्रयत्वे सति सामानाधिकरण्येन कर्मत्वविशिष्टकर्तृत्वानधिकरणत्वम्' इति। 'मया हरिः सेव्यते' इत्युदाहरणम् (अहं हरिं सेवे इति कर्तरिप्रयोगः) स तत्र मद्रूपकर्ता हेतुत्वाश्रयभिन्नः, कर्मकर्तृभिन्नश्च।
'स्वतन्त्रः कर्ता' इति सूत्रेण क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्तृसंज्ञः स्यादित्यर्थः। अयमर्थः कथं लब्धः इति चिन्त्यते। 'स्वतन्त्रः कर्ता' इति द्विपदात्मकोऽयं योगः। तत्र स्वं तन्त्रं यस्य सः स्वतन्त्रः इति। स्वीयं तन्त्रं यस्य भवति सः स्वतन्त्रः कर्ता इति। तत्र तन्त्रं नाम किमिति चेत्, 'तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे' इत्यमरकोशः।[19] एवं तन्त्रशब्दस्य बहवोऽर्थाः उक्ताः। शब्दस्यास्य निष्पत्तिस्तु 'तनु विस्तारे' इत्यस्माद्धातोः औणादिकः ष्ट्रन्–प्रत्ययः।[20] एवं च 'तन्यते इति तन्त्रं, तनोति इति तन्त्रं, तन्त्र्यते इति तन्त्रम् इति बहुधा उक्तम्। अपि च, तन्त्रशब्दस्य वितताः तन्तवः तन्त्रम् इति कश्चन अर्थः इत्युक्ते, तन्तुसमुदायः तन्त्रमिति। स्वं तन्त्रं यस्य सः स्वतन्त्रः इत्युक्ते, स्वः तन्तुसमुदायः यस्य वर्तते सः स्वतन्त्रः इति चेद्, यो वस्त्रनिर्माता वर्तते, तस्य कर्तृसंज्ञा प्राप्नोति। तन्तुसमुदायः यस्य अस्ति, यस्य गृहे बहवः तन्तवः सन्ति, सः स्वतन्त्रः स एव कर्ता इति स्यात्। एवं च वस्त्रनिर्मातुरेव कर्तृसंज्ञा स्यात्, अन्यस्य कस्यापि नेति।
यद्यपि, तन्तुवायो वयति, तन्तुवायो भुङ्क्ते, तन्तुवायो गच्छति इत्यादिस्थलेषु तन्तुवायस्य कर्तृसंज्ञा इष्टैव, तथापि तन्तुवायाद् गृह्णाति इत्यत्र क्लेशः। कथमिति चेत्, तत्र तन्तुवायादिति पञ्चमी विभक्तिः। इदानीं स्वतन्त्रं यस्य सः स्वतन्त्रः इत्यर्थात्, तन्तुवायस्य 'स्वतन्त्रः कर्ता' इति कर्तृसंज्ञा अस्ति, 'ध्रुवमपायेऽपादानम्' इति अपादानसंज्ञाप्यस्ति। वस्तुतः अत्र अपादानसंज्ञाप्रयुक्ता पञ्चमीविभक्तिः कार्या, परन्तु सा न स्यात्। 'अपादानमुत्तराणि कारकाणि बाधन्ते' इत्यतः अनया कर्तृसंज्ञया अपादानसंज्ञायाः बाधात् सर्वदाप्ययं तन्तुवायः कर्ता एवेति। तन्तुवायाद् गृह्णाति इति प्रयोक्तव्ये तन्तुवायः गृह्णाति इति प्रयोगापत्तिः स्वतन्त्रशब्दविषये एवायं क्लेशः संजातः। अतस्तत्र अन्ततोगत्वा किं कृतमित्युक्ते, 'तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे' इत्यत्र तन्त्रशब्दस्य प्रधानमित्यर्थं स्वीकृत्य स्वमात्मा प्रधानं यस्य सः स्वतन्त्र इत्येवंरीत्या विग्रहं कृत्वा दोषः परिह्रियते। क्रियायां यस्य स्वमात्मा प्रधानं भवति, सः स्वतन्त्रः इति।
एवं च किं नाम कर्तृत्वमिति चेदेवं लक्षणमुक्तम्– 'तद्धात्वर्थनिष्ठविशेष्यता– निरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वं कर्तृत्वमिति। चैत्रः पचति इत्युदाहरणस्वीकारे, तत्र धातुः पच्–धातुः तद्धात्वर्थः व्यापारः[21], तद्धात्वर्थनिष्ठविशेष्यता व्यापारनिष्ठविशेष्यता विशेष्यता– निरूपितप्रकारता फलनिष्ठा प्रकारता तादृशप्रकारताऽऽश्रयः फलं, प्रकारतानाश्रयः व्यापारः तादृशव्यापाराश्रयत्वं चैत्रे वर्तते इति चैत्रस्य कर्तृत्वमिति समन्वयः' इति। तद्यथा–

'फलव्यापारयोधातुराश्रये तु तिङः स्मृताः।
फले प्राधानं व्यापारस्तिर्थस्तु विशेषणम्।।' [22]

एवं च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वं कर्तृत्वमिति लक्षणमुक्तम्। तत्र कर्तरिप्रयोगः कर्मणिप्रयोगश्चेति द्वयमस्ति, यथा चैत्रः पचतीति कर्तरि– प्रयोगः चैत्रेण पच्यते इति कर्मणिप्रयोगश्च। अत्रोभयत्रकर्तरिस्थले कर्मणिस्थले च भट्टोजि–दीक्षितमते चैत्राभिन्नैककर्तृकः वर्तमानकालिकः विक्लित्यनुकूलः व्यापारः इति व्यापारमुख्य– विशेष्यकः शाब्दबोधः। पूर्वोक्तलक्षणस्वीकारे अत्र कोऽपि दोषः नास्ति। किन्तु नागेशादीनां मते तु, कर्मणिस्थले– चैत्रेण पच्यते इत्यत्र चैत्रवृत्तिव्यापारजन्यविक्लित्याश्रयः तण्डुलः इति बोधः। तत्र केवलं पूर्वोक्तलक्षणेन समन्वयो न भवति। तद्धातुरित्युक्ते पच् धातुः, तद्धात्वर्थः फलं, तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारता व्यापारनिष्ठप्रकारता, तादृश प्रकारताश्रयः व्यापारः, तदनाश्रयः फलं, फलाश्रयत्वं चैत्रे नास्तीति कृत्वा चैत्रस्य कर्तृसंज्ञा न स्यादित्यापत्तिः।

अतस्तस्मिन् लक्षणे कश्चित् परिष्कारः क्रियते। 'कर्तृप्रत्ययसमभिव्याहारे' इत्यपि योजयित्वा, कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयद्धात्वर्था– श्रयत्वं कर्तृत्वमिति परिष्क्रियते। एवं च चैत्रेण पच्यते इत्यत्र कर्मणिस्थले कर्तृप्रत्यय– समभिव्याहारो नास्ति इत्यतः पूर्वोक्तदोषोऽपि नास्ति। अतः दीक्षितस्य नागेशस्य चोभयानुगतं स्थलं किमिति चेत्, चैत्रेण पक्वस्तण्डुलः इति। तत्तु कर्मकृदन्तस्थलम्। अत्र तूभयोरपि एक एव बोधः।

तत्र किं नाम स्वातन्त्र्यमिति चेत्, लोके इतरानधीनत्वं स्वातन्त्र्यमिति प्रसिद्धम्। तत्स्वीकारे च, देवदत्तः पचति इत्यादौ देवदत्तः स्थाल्यादीतरकारकानधीनतया एव पाकक्रियां निवर्तयति, अन्यानि च कारकाणि देवदत्ताधीनतया एव वर्तन्ते इति देवदत्तस्यैव कर्तृत्वं सिद्धम्। तथापि यत्र अचेतनानां कर्तृत्वं, यथा घटो भवति, रथो गच्छति इत्यादिषु, तत्र अचेतनानां सर्वदा इतराधीनतया एव कार्यनिवर्तकत्वमिति तेषामितरानाधीनत्वरूपं स्वातन्त्र्यं नास्ति इत्यतः कर्तृसंज्ञैव न स्यात्। अतः धातूपात्तव्यापाराश्रयत्वमिति पारिभाषिक स्वातन्त्र्यं विवक्षितम्। एवं च रथो गच्छति इति अचेतनकर्तृकस्थले रथस्य इतराधीनतया कार्यनिर्वाहकत्वे अपि धातूपात्तोत्तरदेशसंयोगानुकूलव्यापाराश्रयत्वं सिद्ध्यति इति तस्यापि कर्तृसंज्ञायां कोऽपि दोषो नास्ति।

देवदत्तः स्थाल्यां काष्ठैः तण्डुलं पचति इत्यादिप्रयोगे तु, यन्निष्ठव्यापारो धातुना अभिधीयते तद्धातूपात्तव्यापाराश्रयत्वं तस्यैव कारकस्य संभवति, इत्युक्ते, यदि पच्–धातुना स्थालीनिष्ठः तण्डुलधारणानुकूलव्यापारो विवक्षितः तर्हि धातूपात्तव्यापाराश्रयत्वं स्थाल्याः एव संभवति इति स्थाल्याः कर्तृत्वे स्थाली पचति इति प्रयोगः सङ्गच्छते। एवं काष्ठे यः ज्वलनानुकूलव्यापारः वर्तते, व्यापारः धातुना विवक्षितश्चेत् धातूपात्तव्यापाराश्रयत्वं काष्ठस्य एव इत्यतः काष्ठस्य कर्तृत्वे काष्ठानि पचन्ति इति प्रयोगश्च साधुरेव। एवं प्रायशः सर्वेषामपि कारकाणां कर्तृत्वे शास्त्रसंमतिरस्तीति शम्।

**सन्दर्भ–सूची–**


1. महाभाष्यम्– 1.4.23
2. परमलघुमञ्जूषा, पृ०– 315
3. लघुशब्देन्दुशेखरः (कारकप्रकरणम्), पृ०– 127
4. महाभाष्यम् (प्रदीपोद्योतम्)– 1.4.23
5. अष्टाध्यायी– 1.4.23
6. परमलघुमञ्जूषा, पृ०– 315
7. वाक्यपदीयम्– 3.7.18
8. वाक्यपदीयम्– 3.7.37
9. वाक्यपदीयम् (हेलाराजकृतटीका)– 3.7.37
10. वाक्यपदीयम्– 3.7.36
11. पाणिनीयव्याकरणतत्त्वप्रदीपः, पृ०– 136
12. न्यायवार्त्तिकम् (तात्पर्यटीका), पृ०– 31
13. लघुशब्देन्दुशेखरः (कारकप्रकरणम्), पृ०– 127
14. अष्टाध्यायीसूत्रपाठः– 1.4.54
15. अष्टाध्यायीसूत्रपाठः– 23.18
16. वैयाकरणसिद्धान्तकौमुदी, सूत्र सं०– 538
17. वैयाकरणसिद्धान्तकौमुदी, सूत्र सं०– 538
18. अष्टाध्यायीसूत्रपाठः– 1.4.52
19. अमरकोषः– 3.3.185.2
20. उणादिसूत्रपाठः, सूत्र सं०– 598
21. परमलघुमञ्जूषा, पृ० सं०– 23
22. वैयाकरणभूषणसारः, कारिका सं०– 2